# 2021

## SANSKRIT — HONOURS

**Paper : CC-11**

**(Vedic Literature)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section – A**

**Unit - I**

**(Marks : 30)**

**1.** निम्नोद्धृतेषु यथाभिमतं ***मन्त्रद्वयस्य*** वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

(a) स न॑ः पि॒तेव॑ सू॒न॒वे
ऽग्ने॑ सूपाय॒नो भ॑व।
सच॑स्वा नः स्व॒स्तये॑॥

(b) जा॒या तप्य॑ते कित॒वस्य॑ ही॒ना
मा॒ता पु॒त्रस्य॒ चर॑तः क्व॑ स्वित्
ऋ॒णा॒वा बि॑भ्य॒द्धन॑मि॒च्छमा॑नो॒-
ऽन्येषा॒मस्त॒मुप॒ नक्त॑मेति॥

(c) यं क्रन्द॑सी अव॑सा तस्तभा॒ने
अ॒भ्यैक्षे॑तां॒ मन॑सा॒ रेज॑माने।
यत्राधि॒ सूर उदि॑तो वि॒भाति॒
कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

(d) अ॒हं राष्ट्री॑ सं॒गम॑नी वसू॑नां
चिकी॒तुषी॑ प्रथ॒मा य॒ज्ञिया॑नाम्।
तां मा॑ दे॒वा व्य॑दधुः पुरु॒त्रा
भूरि॑स्थात्रां॒ भूर्या॑वे॒शय॑न्तीम्॥

**2.** निम्नोद्धृतेषु यथाभिमतं कस्यचि***देकस्य*** मन्त्रस्य व्याख्या कार्या। 8×1

(a) उप॑ त्वाग्ने दि॒वेदि॑वे
दोषा॑वस्तर्धि॒या व॒यम्।
नमो॒ भर॑न्त॒ एम॑सि॥

(b) य आ॑त्मदा ब॑ल॒दा यस्य॒ विश्व॑
उ॒पास॑ते प्र॒शिषं॒ यस्य॑ दे॒वाः।
यस्य॑ छा॒यामृतं॒ यस्य॑ मृ॒त्युः
कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

(c) मया॒ सो अन्न॑मत्ति॒ यो वि॒पश्य॑ति
यः प्राणि॑ति य ईं॑ शृ॒णोत्यु॒क्तम्।
अ॒म॒न्तवो॒ मां त उप॑ क्षियन्ति
श्रु॒धि श्रु॑त श्रद्धि॒वं ते॑ वदामि॥

***अथवा***

अधोलिखितेषु सन्दर्भेषु यथाभिलाषम् ***एकतमस्य*** व्याख्या कार्या। 8×1

(a) तस्मिन् सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः।

(b) अग्नीषोमप्रणयने उप त्वाग्ने इत्यादिकोऽनुवचनीयस्तृचः।

(c) वरुणप्रघासेषु कायस्य हविषो 'हिरण्यगर्भ' इत्येषा याज्या।

**3.** (a) 'हिरण्यगर्भः समवर्तताग्रे' – इत्यादिकस्य सूक्तस्य क ऋषिः, का देवता, किं वा छन्दः? हिरण्यगर्भ-शब्दस्य कोऽर्थः? सूक्तेऽस्मिन् स्तुताया देवतायाः स्वरूपवैशिष्ट्यं पर्यालोच्यताम्। 3+3+6

***अथवा***

(b) कथम् अक्षसूक्तं लौकिकमिति उच्यते? ऋग्वेदस्य कस्मिन् मण्डले दृश्यते सूक्तमिदम्? अत्र कौ ऋषी, काश्च देवताः? सूक्तस्य अस्य आशयः संक्षेपेण निर्दिश्यताम्। 2+1+2+3+4

## Unit - III

**(Marks : 10)**

**4.** (a) अधोलिखितयोः मन्त्रयोः वङ्गभाषया आङ्गलभाषया वा अनुवादः करणीयः। 5×2

(i) स॒त्यं बृ॒हदृ॒तमु॒ग्रं दी॒क्षा
तपो॒ ब्रह्म॑ पृ॑थि॒वीं धा॑रयन्ति।
सा नो॑ भू॒तस्य॒ भव्य॑स्य॒ पत्न्यु-
रुं लो॒कं पृ॑थि॒वी नः॑ कृणोतु॥

(ii) यस्यां पूर्वे पूर्वजना विचक्रिरे
यस्यां देवा असुरानभ्यवर्तयन्।
गवामश्वानां वयसश्च विष्ठा
भगं वर्चः पृथिवी नो दधातु।।

***अथवा***

(b) अधोलिखितयोः यथाभीष्टं ***एकतरस्य*** मन्त्रस्य सप्रसङ्गं व्याख्या कार्या। 10×1

(i) यस्यां समुद्र उत सिन्धुरापो
यस्यामन्नं कृष्टयः संबभूवुः।
यस्यामिदं जिन्वति प्राणदेजत्
सा नो भूमिः पूर्वपेये दधातु।।

(ii) विश्वंभरा वसुधानी प्रतिष्ठा
हिरण्यवक्षा जगतो निवेशनी।
वैश्वानरं बिभ्रती भूमिरग्नि-
मिन्द्रऋषभा द्रविणे नो दधातु।।

***अथवा***

(c) सांमनस्यसूक्तं कुत्र उपलभ्यते? सूक्तेऽस्मिन् कति मन्त्राः सन्ति? सूक्तस्यास्य ऋषिः कः, देवता का वा? सूक्तस्यास्य प्रतिपाद्यं विषयं पर्यालोच्यताम्। 1+1+2+6

**Section – C**

**Unit - I**

**(Marks : 10)**

**5.** (a) अधोदत्तयोः वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः करणीयः। 5×2

(i) बिभृहि मा पारयिष्यामि त्वेति कस्मान्मां पारयिष्यसीत्यौघ इमाः सर्वाः प्रजा निर्वोढा ततस्त्वा पारयितास्मीति कथं ते भृतिरिति।

(ii) शश्वद्ध झषऽआस। स हि ज्येष्ठं व्वर्धतेऽथेतिथीँ समां तदौघ आगन्ता तन्मा नावमुपकल्प्योपासासै स औघ उत्थिते नावमापद्यासै ततस्त्वा पारयितास्मीति।।

***अथवा***

(b) अधोलिखितयोः यथाभिलाषम् ***एकतरस्य*** सप्रसङ्गं व्याख्या कार्या। 10×1

(i) उत मत्स्यो वै मत्स्यं गिलति।

(ii) मनुरेवैकः परिशिशिषे।

**Please Turn Over**

***अथवा***

(c) कस्मिन् ब्राह्मणे समाम्नायते शुनःशेपाख्यानम्? आख्यानस्यास्य नामान्तरं किञ्चित् समुल्लिख्यताम्। कश्च ऋषिः ब्राह्मणस्यास्य? शुनःशेपस्य पिता कः आसीत्? तेन कस्मै कथं शुनःशेपो विक्रीतः? 1+1+1+1+6

**Unit - II**

**(Marks : 15)**

**6.** निम्नोद्धृतेषु ***एकतमस्य*** सप्रसङ्गं व्याख्या कार्या। 7×1

(a) अणुः पन्था विततः पुराणो
मां स्पृष्टोऽनुवित्तो मयैव।
तेन धीरा अपियन्ति ब्रह्मविदः
स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः।

(b) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः।।

(c) तद् यथा तृणजलायुका तृणस्यान्तं गत्वा अन्यम् आक्रममाक्रम्य आत्मानमुपसंहरत्येवम् अयमात्मा इदं शरीरं निहत्याविद्यां गमयित्वा अन्यमाक्रमम् आक्रम्यात्मानमुपसंहरति।

**7.** (a) बृहदारण्यकोपनिषद् कस्मिन् वेदे समाम्नाता? अस्याम् उपनिषदि प्रतिपादितं आत्मस्वरूपं संक्षेपेण आलोच्यताम्। 2+6

***अथवा***

(b) 'अमृतत्वस्य तु नाशास्ति वित्तेन' – कमुद्दिश्य कस्योक्तिरियम्? कुत्रोऽयं सन्दर्भः समाम्नातः? तत्र प्रतिपादितः अमृतत्वलाभोपायः संक्षेपेण विव्रियताम्। 2+1+5